# ॥ યોગશાન્તિપ્રદં ગણાધીશસ્તોત્રમ્ ॥

.. yogashAntipradaM gaNAdhIshastotram ..

sanskritdocuments.org

September 11, 2017

# .. yogashAntipradaM gaNAdhIshastotram ..

# ॥ યોગશાન્તિપ્રદં ગણાધીશસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : yogashantipradaM gaNAdhiishastotram

File name : yogashAntipradaMgaNAdhiishastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P : Amith K Nagaraj(amithkn at rediffmail.com)

Proofread by : Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : mudgalapurANa

Latest update : May 17, 2004

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

શ્રીગણેશાય નમઃ ।
કર્દમ ઉવાચ ।
કેનોપાયેન ભો વત્સ યોગશાન્તિઃ પ્રલભ્યતે ।
તદર્થં પૂજનીયં કિં તદ્વદસ્વ જનાર્દન ॥ ૧॥

કપિલ ઉવાચ ।
ગણેશભજનં મુખ્યં શાન્તિયોગપ્રદં મતમ્ ।
યોગાકારસ્વરૂપં તં બ્રહ્મેશં ભજ માનદ ॥ ૨॥

સર્વાદિઃ સર્વપૂજ્યોઽયં સર્વાધારો મહામુને ।
ય આદિઃ પ્રલયાન્તે સ તિષ્ઠતિ શાસ્ત્રસંમતમ્ ॥ ૩॥

જ્યેષ્ઠરાજં ગણેશાનં વેદેષુ પ્રવદન્તિ તમ્ ।
ગણાઃ સમૂહરૂપાશ્ચ તેષાં સ્વામી પ્રકથ્યતે ॥ ૪॥

નાનાજગત્સ્વરૂપં વૈદેહરૂપં કૃતં મુને ।
નાનાબ્રહ્મમયં તેન શિરઃ કૃતં મહાત્મના ॥ ૫॥

યસ્માજ્જાતમિદં યત્ર હ્યન્તે ગચ્છતિ મહામતે ।
તદ્વેદે ગજશબ્દાખ્યં શિરસ્તેન ગજાનનઃ ॥ ૬॥

ત્રિવિધં ભેદયુક્તં યદખણ્ડં વૈ તુરીયકમ્ ।
તયોર્યોગે ગણેશોઽયં દેહમસ્તકયોર્ગતઃ ॥ ૭॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં તત્ર મોહશ્ચ પઞ્ચધા ।
મોહરૂપા મહાસિદ્ધિર્બુદ્ધિશ્ચ મોહધારકા ॥ ૮॥

તયોઃ સ્વામી ગણાધીશશ્ચિત્તે નિત્યં પ્રતિષ્ઠિતઃ ।
ચિન્તામણિર્મહાભાગો લભ્યતે યોગસેવયા ॥ ૯॥

પઞ્ચધા ચિત્તમુત્સૃજ્ય તદૈશ્વર્યં તથૈવ ચ ।
યોગઃ શાન્તિમયઃ સદ્યઃ પ્રાપ્યતે બ્રહ્મણસ્પતિઃ ॥ ૧૦॥

તસ્માત્તં ભજ મન્ત્રેણૈકાક્ષરેણ મહામુને ।
તેન તુષ્ટો ગણેશાનો યોગં દાસ્યતિ શાન્તિદમ્ ॥ ૧૧॥

ઇતિ મુદ્ગલપુરાણાન્તર્ગતં શ્રીગણાધીશસ્તોત્રં સમાપ્તમ્ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)

and Amith K Nagaraj (amithkn@rediffmail.com)
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. yogashAntipradaM gaNAdhIshastotram ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*